( पुण्याहवाचनम् )

तैत्तिरीय संहिता । काण्डम् ५, प्रपाठकः ६, अनुवाकः १
तैत्तिरीय ब्राह्मणम् । अष्टकम् १, प्रश्नः ४, अनुवाकः ८

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीस्स्वस्तिरस्तु नः।
स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।
ॐ शान्तिश्शान्तिश्शान्तिः।

ॐ ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः।
अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शꣳ स्योना भवन्तु॥

यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम्।
मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शꣳ स्योना भवन्तु॥

यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शꣳ स्योना भवन्तु॥

शिवेन मा चक्षुषा पश्यताऽऽपश्शिवया तनुवोप स्पृशत त्वचं मे।
सर्वाꣳ अग्नीꣳ रप्सुषदो हुवो वो मयि वर्चो बलमोजो नि धत्त॥

पवमानस्सुवर्जनः । पवित्रेण विचर्षणिः। यः पोता स पुनातु मा। पुनन्तु मा देवजनाः।
पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा।
शुक्रेण देवदीद्यत्। अग्ने क्रत्वा क्रतूꣳ रनु। यत्ते पवित्रमर्चिषि। अग्ने विततमन्तरा।
ब्रह्म तेन पुनीमहे। उभाभ्यां देवसवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे।
वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः।
तया मदन्तः सधमाद्येषु। वयꣳ स्याम पतयो रयीणाम्।
वैश्वानरो रश्मिभिर्मा पुनातु। वातः प्राणेनेषिरो मयो भूः।
द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये मा पुनीताम्।
बृहद्भिः सवितस्तृभिः। वर्षिष्ठैर्देवमन्मभिः।
अग्ने दक्षैः पुनाहि मा। येन देवा अपुनत।

येनापो दिव्यंकशः। तेन दिव्येन ब्रह्मणा। इदं ब्रम्ह पुनीमहे। यः पावमानीरध्येति।
ऋषिभिस्सम्भृतꣳ रसम्। सर्वꣳ स पूतमश्नाति।
स्वदितं मातरिश्वना। पावमानीर्यो अध्येति।
ऋषिभिस्सम्भृतꣳ रसम्। तस्मै सरस्वती दुहे। क्षीरꣳ सर्पिर्मधूदकम्॥
पावमानीस्स्वस्त्ययनीः। सुदुघाहि पयस्वतीः।
ऋषिभिस्सम्भृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्।
पावमानीर्दिशन्तु नः। इमं लोकमथो अमुम्।
कामान्थ्समर्धयन्तु नः। देवीर्देवैः समाभृताः।
पावमानीस्स्वस्त्ययनीः। सुदुघाहि घृतश्चुतः।
ऋषिभिस्संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्।
येन देवाः पवित्रेण। आत्मानं पुनते सदा।
तेन सहस्रधारेण। पावमान्यः पुनन्तु मा।
प्राजापत्यं पवित्रम्। शतोध्यामꣳ हिरण्मयम्।
तेन ब्रह्म विदो वयम्। पूतं ब्रह्म पुनीमहे।
इन्द्रस्सुनीती सहमा पुनातु। सोमस्स्वस्त्या वरुणस्समीच्या।
यमो राजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयन्त्या पुनातु। भूर्भुवस्सुवः।

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः।
स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।
ॐ शान्तिश्शान्तिश्शान्तिः।

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

Please send corrections to sanskrit@cheerful.com
Last updated July 3, 2000